संस्कृत-भवितव्यम्

● निरन्तरं पञ्चषष्टिवर्षाणि प्रकाश्यमानं विश्वस्य एकमेव संस्कृतसाप्ताहिकम् ●

संस्कृत-भाषा-प्रचारि-सभायाः मुखपत्रम्

अङ्क-मूल्यम् रु. ५/- वा. शु. : रु. २५०/-	PRINTED MATTER	वृत्तपत्र-पञ्जीयन-संख्या RN 11454/57
Core Banking Facility : **Name :** Sanskrit Bhasha Pracharini Sabha **A/c No. :** 30362855441 **IFSC/CIF Code :** SBIN0004872	डाकप्रेषण पञ्जीयनसंख्या NGP-27 Postage Licence No. 9	
	संपादिका **डॉ. लीना रस्तोगी**	सहसंपादिकाद्वयम् **डॉ. वीणा गानु, डॉ. शारदा गाडगे**

संस्थापक-संपादकः
स्व. डॉ. श्री. भा. वर्णेकर

वर्षम् ६५, अङ्कः ४४
शनि. दि. १६ जानेवारी २०१६, पौष शु. ७
शके १९३७, युगाब्द ५११७

ISBN 978-0-00-000978-4
13 Digit ISBN : 978-1-890041-04-5
Barcode ISBN : 978-0-00-000978-4:18900

प्रबन्धिका
डॉ. प्रज्ञा देशपाण्डे
prabandhika.sanskbhavitavyam@gmail.com

प्रकाशकः
डॉ. चन्द्रगुप्त वर्णेकर
०९३७०८०३९१३
cswarnekar@gmail.com

संस्कृत-भवनम्,
२, पश्चिमः उच्च-न्यायालय-मार्गः, नागपुरम् - ४४० ००१.

www.sanskritbps.org

सुसंस्कृत-पत्रकारिताविषयिकी कार्यशाला - सुखदः अनुभवः!

वार्ताः

वामतः:
श्री. रवीन्द्र कासखेडीकर,
श्री. न. र. पत्तरकिने,
प्रा. डॉ. धर्मेश धावणकर,
प्रा. मा. गो. वैद्य,
डॉ. बलदेवानन्दसागरः,
श्री. राहुल पाण्डे

संस्कृतपत्रकारितायाः सार्धशताब्दमनुलक्ष्य नागपुरे संस्कृत-भाषा-प्रचारिणी सभा ९ जानेवारी २०१६ तमे दिवसे कामपि कार्यशालाम् आयोजयति इति सूचना **तरुण-भारत**-वार्तापत्रे मया पठिता। अहं संस्कृतस्य छात्रा अस्मि। **संस्कृत-भवितव्यम्** इति वार्तापत्रं पठामि। किन्तु संस्कृत-पत्रकारितायाः विषये नास्ति मे ज्ञानम्। अतः एनां कार्यशालां गन्तुम् अहम् उत्सुका अभवम्।

९ जाने इत्यस्मिन् दिवसे सार्धदशवादनसमये अहं संस्कृतभवनं प्राप्ता। प्रवेशद्वारे एव नामाङ्कन-समितिः सुहास्यवदनेन मम स्वागतम् अकरोत्। भवनस्य पुरतः आलिखिता रङ्गावली, 'स्वागतं बलदेवानन्द राय' इति मराठी काव्यरचनया विलसिता अग्रभित्तिका, सुसज्जं सभागृहम्, आयोजकानां त्वरा एतद् सर्वं निरीक्षमाणा अहम् आसन्दे उपविष्टा। एकादश-वादनसमये कार्यशाला आरब्धा। सभा-सचिवेन डॉ. चन्द्रगुप्त महोदयेन कार्यशालायाः पार्श्वभूमिः विशदीकृता। संस्कृत-पत्रकारितायाः सार्ध-शताब्द-निमित्तेन आयोजिते अस्मिन् उपक्रमे ज्येष्ठः संस्कृत-वार्ता-प्रवाचकः **डॉ. बलदेवानन्द सागर** महोदयः विशेषत्वेन निमन्त्रितः आसीत्। पत्रकारिता क्षेत्रे भीष्मपितामहकल्पः **प्रा. मा. गो. वैद्य** महाभागः उद्घाटकः आसीत् कार्यशालायाः। सभायाः अध्यक्षा **डॉ. लीना रस्तोगी** महोदया अध्यक्षस्थाने विराजिता आसीत्। डॉ. सागर महोदयेन स्वकीये बीजभाषणे संस्कृतभाषायाः तथैव संस्कृत-पत्रकारितायाः विषये महान आशावादः प्रकटितः। महाभागस्य उत्साहपूर्णेन वक्तृत्वेन सभागृहे नवचैतन्यं निर्मितम्। प्रा. मा. गो. वैद्य महोदयेन पत्रकारेण कथं वर्तितव्यं, वार्तापत्रस्य वाचकसंख्या वर्धनार्थं के के प्रयत्नाः करणीयाः, धनार्थं पत्रकारेण आत्मनः अवमूल्यनं न करणीयम् इत्यादयः बिन्दवः प्रस्तुताः। **डॉ. रस्तोगी महोदया**याः अध्यक्षीय-भाषणेन एतद् सत्रं समाप्तिं गतम्।

भोजनात् अनन्तरं द्वितीयं सत्रम् आरब्धम्। अस्मिन् सत्रे **नन्दन-वर्णेकरः** इत्यनेन युवकेन सङ्गणकस्य साहाय्येन वार्ता-सङ्कलनं, वार्ता-प्रेषणं, वार्ता-मुद्रणं, वार्ता-प्रसारणम् इत्यादीनां कार्याणां प्रक्रिया छायाचित्र-माध्यमेन स्पष्टीकृता। अस्मिन् कार्ये **सुश्री. निरञ्जनी महाजन** नामधेया युवती तस्य सहायिका आसीत्। श्रोतृभिः उपस्थापितानां शङ्कानां निरसनमपि नन्दन महोदयेन सम्यग्रीत्या कृतम्। डॉ. बलदेवानन्दसागर महोदयेन दृक्-श्राव्य माध्यमैः विद्यापीठ अनुदान आयोगः संस्कृत पत्रकारिता विषये कथम् अध्यापयति इति प्रदर्शितम्। एतत् सत्रमतीव छात्रोपयुक्तमासीत्।

तृतीये सत्रे नितरां श्रवणीयः परिसंवादः आसीत्। अस्मिन् परिसंवादे प्रा. मा. गो. वैद्य महाभागः अध्यक्षस्थाने विराजितः आसीत्। परिसंवादस्य सूत्राणि स्वयं डॉ. सागर महाभागः सोत्साहं सञ्चालितवान्। हितवाद वृत्तपत्रस्य **श्री. राहुल पाण्डे** महाभागः,

--- *अग्रे तृतीये पृष्ठे*

तावदेव प्रतिष्ठा स्याद् भारतस्य महीतले।
ज्ञानामृतमयी यावत् सेव्यते सुरभारती॥

सम्पादकीयम्

सङ्क्रमणम्

प्रतिमासं खगोले राश्यन्तरं कुर्वन् भानुः यदा मकरराशिं प्रविशति तदा प्रारभते भारते सर्वत्र सङ्क्रान्तिपर्व। क्रम् धातोः क्तिन् प्रत्ययेन साधितः 'क्रान्ति'-शब्दः यद्यपि परिवर्तन-सूचकः भवति तथापि 'सम्' उपसर्गेण खलु समुचितं सन्मार्गानुसरणमेव संसूच्यते। 'तमसो मा ज्योतिर्गमय' इति वेदवचनं स्मारयति इदं पर्व। सम्प्रति कदाचित् विस्फोटैः, गुलिका-वर्षाभिः, आत्मघातैश्च यां क्रान्तिं साधयितुं जगति सर्वत्र यतन्ते आतङ्कवादिनः, सा नैव सङ्क्रान्तिः; प्रत्युत सर्वनाशः। न्यूयॉर्क, मुम्बई, दिल्ली, लण्डन्, इस्ताम्बूल, पॅरीस्, जकार्ता, पठाणकोट सदृशीभिः नगरीभिः भृशमनुभूतं तादृशमातङ्कतमः। तं हिंसात्मकं तमोमयपथं मा गमय इति संसूचयति इयं सङ्क्रातिः मानवाय। अस्मिन्नेव कालखण्डे स्वामिविवेकानन्दस्य जयन्त्यवसरे 'दिव्यत्वं प्रापय, न तु पशुत्वम्', इति शुभसन्देशं प्रददाति सङ्क्रमण-पर्व इदम्।

सांस्कृतिकं महत्त्वम्

पर्व इदं भारते किमपि वैशिष्ट्यपूर्णं वैविध्यपूर्णं च सांस्कृतिकं महत्त्वं भजते। क्षीयमाणः शिशिरर्तुः प्रफुल्लम्, आल्हादकरं वसन्तम् आह्वयति। मन्दायते शैत्यम्। नूतनैः कृष्युत्पादनैः प्रमुदिताः भवन्ति कृषकाः। उत्तरभारते 'लोहडी' इति अग्निसाक्षः नृत्यप्रकारः, पूर्वोत्तरे 'बीहू'-नृत्यम्, गङ्गा-सागरे/तीर्थस्थानेषु च स्नानपर्व, मध्यभारते/महाराष्ट्रे तिलगुड-मिष्टान्नम्, दक्षिणभारते 'पोङ्गल'-उत्सवः, गुजराते पतङ्ग-महोत्सवः, रङ्गावलिः, सूर्योपासना इत्यादयः सांस्कृतिकोत्सव-प्रकाराः डिण्डिमायन्ते आसेतुहिमाचले भारतवर्षे। क्षीयते रात्रिकालस्य तमः, लम्बायते दिवा रवेः प्रकाशकालः। अस्मिन् पौषमासे सङ्क्रमणकाले बालाः युवानः च यथेष्टं क्रीडाङ्गणे सूर्यातपे क्रीडन्तु, अत एव स्वास्थ्यवर्धका पतङ्गक्रीडा भारतीयैः पूर्वसूरिभिः प्रारब्धा। 'पतङ्गः' इत्यस्य शब्दस्य अर्थ एव सूर्यः, तथैव 'पूषन्' इत्यस्यापि। आदित्यस्यैव पर्व खलु इदम्। मकरसङ्क्रान्तितः रथसप्तमीं यावत् महाराष्ट्रप्रदेशे सधवाः महिलाः परस्परं हरिद्राकुङ्कुमं सौभाग्यवायनं च प्रयच्छन्त्यः शुभं चिन्तयन्ति। बालाः युवानः च सूर्यनमस्कारान् कुर्वन्ति। प्रकारोयं योगव्यायामस्य महत्त्वपूर्णमङ्गमेव भवति। अनेन योगेनैव २१ जून दिनाङ्के विश्वयोगदिवसरूपेण राष्ट्रमण्डलस्य मान्यता अधिगता। एवं भारतस्य सांस्कृतिकं वैशिष्ट्यं जगति परिवर्धितम्।

ज्योतिष्पञ्चाङ्गवैशिष्ट्यम्

मेषो वृषोऽथ मिथुनः कर्कः सिंहश्च कन्यका।
तुलाथ वृश्चिको धन्वी मकरः कुम्भ-मीनकौ॥

इति द्वादशराशयः सन्ति खगोले। रविः प्रतिमासम् एकैकस्मिन् राशौ स्थित्वा अग्रे सरति। एवं धनुराशिम् उल्लंघ्य यदा मकरराशिं प्रविशति भानुः तदा मकरसङ्क्रान्तिपर्व वर्तते। धनुराशिकाले (प्रायः भानुवासरे) अपि केचन जनाः सूर्योदयकाले कृशरां (खिचडी) भक्षयन्ति। पौषादित्यवासरः तादृशं विशिष्टं महत्त्वं भजते। ऐषमः हरिद्वारक्षेत्रे अर्धकुम्भोत्सवः सङ्क्रान्तिदिने एव प्रारब्धः, यतोहि सम्प्रति सिंहस्थः वर्तते गुरुः, मकरराशिं च प्रयाति रविः।

विकासपर्व

सङ्क्रमणेनैव संसाध्यते विकासः। यथोक्तमुपरि आतङ्कातिरेकात्याचार-भ्रष्टाचार-सदृशानां दुर्गुणानां तमः यदा क्षीणायते तदा एव सङ्क्रमणेन प्रकाशते विकासपर्व। सम्प्रति प्रधानमन्त्रिणः नेतृत्वे विविधाः विकासयोजनाः केन्द्रशासनेन प्रारब्धाः सन्ति। तासां साफल्यं तमोनिवारणेन भवति। जनतन्त्रप्रशासने जागृतजनताजनार्दनस्य सहकार्येण तमो निवार्य विकासकार्यं साधयति प्रशासनम्। यथा तिलानां स्नेहः, गुडस्य च माधुर्यं स्वास्थ्यवर्धकौ भवतः, तथैव जनता-प्रशासनयोः सहयोगः विकासवर्धकः। तादृशः सुयोगः एव -

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग् भवेत्॥

इति सौख्यसाधकः भविता। इति शम्!

● डॉ. चन्द्रगुप्तः वर्णेकर

सुसम्पन्नं संस्कृतशिक्षकसम्मेलनम्

अग्रिमे सप्ताहे १६ जानेवारी दिनाङ्के सम्पत्स्यमानानां सभायाः संस्कृतपरीक्षाणां विषये सम्मेलनमिदं शनिवासरे ९ जानेवारी-दिनाङ्के ४ वादने संस्कृतभवने सञ्जातम्। पञ्चशताधिकाः संस्कृतशिक्षकाः समुपस्थिताः आसन् येषां सुष्ठु मार्गदर्शनं कृतवती **डॉ. हंसश्री मराठे।**

अहमस्मि कविः !

अहमस्मि कविः
शारदात्मजः
क्रान्तप्रतिभो नवरसरुचिरः
शब्दब्रह्मोपासनारतः
अभिरुचितसृष्टिवेधाश्चतुरः
स्वाधीनोपायोऽपराजितः
परिभूश्च स्वयम्भूः स्वयम्प्रभुः
कविरस्मि जगत्त्रयविलक्षणः॥१॥

तरुमूलं वसुन्धरागर्भे
ननु कियद् गभीरं कियद् दृढम् ?
कियदुत्तुङ्गं नीलाकाशे
गिरिशिखरं कियत्पुनस्तीक्ष्णम् ?
शैतल्यं कियत्कीदृशं वा
निर्झरसरिदम्बुदबिन्दूनाम् ?
दाहश्च कीदृशः
सूर्यवह्निवाडवसन्तापज्वालानाम् ?
द्राक्षाऽपेक्षयाऽपि हन्त कियन्
माधुर्यं जननीचुम्बानाम् ?
कुलिशाऽपेक्षया कियच्चण्डं
दुस्सहप्रहरणं दुर्वचसाम् ?
इत्येवमादिशत-शतनिगूढपृच्छामर्माऽहं
परिचिनोमि
प्रस्तूय समाधानं शनकैः
स्तिमितं कोविदवृन्दं करोमि
जातोऽस्मि जगति केवलमेको जीवोऽहं
बन्धो !
स्वलक्षणः
कविरस्मि संसृतौ विलक्षणः॥२॥

स्यामहं कथं जगदासक्तो
मदभीष्टं जगत् किमप्यन्यत्
स्यामहं कथं रूपासक्तो
मदभीष्टरूपमन्यत् किञ्चित्
ननु **गन्धमृगो**ऽहं
ग्रन्थिपर्णप्रणयी
दूर्वा अश्नानि कथम् ?
मानसविहारपटु **वरटो**ऽहं
लघुपल्वलजलं पिबानि कथम् ?
क्षुण्णः पन्था रोचते न मे
नूतनसरणिं तस्मात्सृजामि
सङ्कल्पनिर्मितायां सृष्टौ
प्रत्नेतरतरणिं विरचयामि
सत्यश्च शिवं सुन्दरं जगत्
यत्नैर्लक्ष्यैः कर्तुं प्रयते
जननान्तरार्जिता या प्रतिभा
एतत्सर्वं च तया विदधे॥

दुर्विज्ञेयं मामकं मनो
ननु दुराधिरोहाः सङ्कल्पाः
दुर्व्याख्येयं विषमं चरितम्
अनितरतुल्याश्च समे जल्पाः
केचिन्मामृषिं विदन्ति मुदा
हस्तामलकीकृतजगत्त्रयम्
केचिच्चोन्मत्तं शून्यधियं
घुष्यन्ति च मां कुण्ठितक्रियम्
नाहं हृष्यामि न वा दूये
अनुशंसानिन्दा-पराङ्मुखः
हर्षे च विषादे समस्थितः
आत्मारामो जगतो विमुखः।
सलिले नलिनीदलमिव नूनं
जीवनं ममास्मिन् संसारे
कैवर्तविहीनोऽहं पोतो
जलपोतोऽहं पारावारे ! !
कुत आयातः
क्व च गन्तव्यं
कियदर्वाच्छ पृथिव्यां
स्थातव्यम्
किं करणीयम्
किमकरणीयम् ?
निर्मातव्यं किं प्राप्तव्यम् ?
सर्वं ज्ञात्वाऽपि यते ज्ञातुं
को वा भविता
मेऽन्तिमक्षणः ?
कविरस्मि संसृतौ विलक्षणः॥३॥

अभिराज-राजेन्द्र-मिश्रः

प्रथम पृष्ठतः अग्रे ---

संस्कृत-पत्रकारिताविषयिकी कार्यशाला

रातुम नागपुरविद्यापीठस्य जनसंवाद विभागप्रमुख डॉ. धर्मेश धावणकरः, श्री. बबन नारवले, श्री. रवीन्द्र कासरखेडीकर, श्री. नन्दकिशोर-पत्तरकिने-महाभागः विशेषत्वेन निमन्त्रिताः आसन्। सर्वैः व्याख्यातृभिः स्वविचाराः स्पष्टतया प्रस्तुताः। श्रीमता पत्तरकिने-महोदयेन संस्कृत पत्रकारितायाः ऐतिह्यं प्रस्तुतम्। **'संस्कृत-भवितव्यम्'** इति साप्ताहिकस्य इतिहासः शैली चापि सम्यक्तया परिचायितौ। **प्रा. मा. गो. वैद्य** महाभागेन अध्यक्षीये भाषणे कार्यशालायाः समापनं कृतम्। सभा-कोषाध्यक्षेण श्रीमता सेनाड महोदयेन सर्वान् प्रति कृतज्ञता निर्दिष्टा। एकतामन्त्रेण आदिवसं सम्पन्ना इयं कार्यशाला अवसिता। **डॉ. प्रज्ञा देशपाण्डे** महोदयया कार्यशालायाः सूत्राणि सुष्ठु सञ्चालितानि। तस्याः आदेशानुसारं सर्वैः सहभागिच्छात्रैः उद्घाटनसमारोहस्य वार्ता स्वशब्दैः लिखित्वा आयोजकेभ्यः समर्पिता। प्रतिक्रिया अपि प्रत्यर्पिता।

अतीव उत्साहपूर्णे वातावरणे सम्पन्ना इयं कार्यशाला अस्मद्भ्यः छात्रेभ्यः किं किं न दत्तवती ? अनुशासनस्य उत्तमः पाठः, आयोजन-कौशलम्, आयोजकानां परिश्रमशीलता, संस्कृत-परिवारस्य ऐक्यं, चिन्तनपूर्णानि व्याख्यानानि, संस्कृतं प्रति रचनात्मकः दृष्टिकोणः, डॉ. सागर महोदयस्य चैतन्यपूर्णं मार्गदर्शनं, डॉ. रूपा कुळकर्णी प्रभृतीनां मान्यवराणां, संस्कृत-विदुषाम् उपस्थितिः, युवकानां सहभागः, जल-चाय-भोजनादीनाम् उत्तमा व्यवस्था इत्यादिकं सर्वं मया अत्र प्रत्यक्षीकृतम्। पत्रकारितायाः विषये परिज्ञानं मया अत्र प्राप्तम्। पत्रकारितायाः कार्यशालायाः मम अनुभवः नितरां ज्ञानप्रदः, सुखप्रदः, उत्साहप्रवर्धकः च भवति। मत्सदृशानां सर्वेषाम् अपि छात्राणाम् एषः एव अभिप्रायः स्यात् इति मम निश्चिता मतिः। एतादृशानाम् उपक्रमाणाम् आयोजनं सभया पुनःपुनः करणीयम् इति प्रार्थना।

कविता ढवळे

मार्तण्डराव-वाईकर-स्मृति-व्याख्यानम् ऐषमः शनिवासरे ६ फेब्रुवारीदिनाङ्के सायङ्काले भविता। नवदेहलीनिवासी **प्रा. डॉ. चन्द्रभूषण झा, ''साम्प्रतिक-संस्कृतपत्रकारितायाः भाषिकं समीक्षणम्''** इति विषये उद्बोधयिष्यति।

बालानां सुखबोधाय ...

परिश्रमे श्रीः प्रतिवसति

पश्चिमसमुद्रतीरे वसन्तनामधेयः कश्चित् युवकः प्रतिवसति स्म। सः अतीव निर्धनः आसीत्। तथापि सः परिश्रमशीलः आसीत्। किन्तु केन मार्गेण धनम् अर्जितव्यम् इति सः न अवगच्छति स्म। एकदा सः देवालयं गत्वा अगतिकतया देवं प्रार्थयत, ''हे देव, मम निर्धनत्वं कदा यास्यति? मह्यं धनं देहि, मम दारिद्र्यम् अपनय।'' तस्य आर्ततां दृष्ट्वा भगवान् तम् उक्तवान्, ''वत्स, अहं तुभ्यं धनस्य वृक्षद्वयं ददामि। तौ संवर्धय। ताभ्यां त्वं धनं लप्स्यसे।'' इति उक्त्वा भगवान् तस्मै अल्पाकारं वृक्षद्वयम् अयच्छत्। वसन्तः नितराम् आनन्दितः। भगवता दत्तं तद् धनतरुद्वयं गृहीत्वा सः गृहं प्रत्यागच्छत्। गृहस्य अङ्गणे सः वृक्षद्वयं सप्रयत्नं समवर्धयत्। किन्तु वृक्षयोः कदापि नाणकानि तेन न दृष्टानि। एकदा गृहम् आगतं पितृव्यं तेन धनवृक्षौ दर्शितौ। पितृव्यः अवदत्, ''रे मूर्ख, न एतौ धनवृक्षौ। नारिकेलवृक्षौ एतौ।'' पितृव्यस्य वचः श्रुत्वा वसन्तः निराशः अभवत्। शनैः शनैः वृक्षौ वृद्धौ। नारिकेलफलानि आगतानि। धनं प्रतीक्षमाणः वसन्तः ''देवेन अहं वञ्चितः'' इति अचिन्तयत्। तस्य नैराश्यं दृष्ट्वा कश्चित् ग्रामस्थः तम् अवदत्, ''वत्स, ईश्वरेण तुभ्यम् एतौ कल्पवृक्षौ प्रदत्तौ। नारिकेलफलानां विक्रयेण धनम् अर्जय।'' तस्य उपदेशानुसारं वसन्तेन तानि नारिकेलफलानि आपणे विक्रीतानि। तेषां विक्रयेण प्राप्तस्य धनस्य विनियोगेन तेन अन्येषां ग्रामस्थानां वृक्षाणां नारिकेलफलानि क्रीतानि। शनैः शनैः तस्य नारिकेलफलानां वाणिज्यं वृद्धिंगतम्। तेन अल्पाकारं क्षेत्रं क्रीतम्। तत्रापि सः नारिकेलफलानां संवर्धनम् आरब्धवान्। एवम् ईश्वरेण प्रदत्तं वृक्षद्वयं तस्य निर्धनताम् अपानयत्। आनन्दितः सः एकदा पुष्पमालां मिष्टान्नं च गृहीत्वा देवालयम् अगच्छत्। देवं पूजयित्वा पुनः पुनः प्रणम्य सः अवदत्, 'देव भवता प्रदत्तेन वरदानेन अवगतं मया श्रमस्य माहात्म्यम्। परिश्रमे श्रीः प्रतिवसति, न वृक्षे, न मन्दिरे न वा गृहे इति मया अवगतम्।'

● **डॉ. शारदा गाडगे**

वार्ताः

■ **जम्मूकश्मिरस्य मुख्यमन्त्री मुफ्ती-महंमदसईद** ७ जानेवारी दिनाङ्के निधनं गतः। तस्य पुत्री महबूबामुफ्ती भाजपक्षस्य सहकार्येण मुख्यमन्त्रिपदे विराजमाना भविता, इति वार्ता।

■ **शम्भोः वाहनाय शम्! -** महाराष्ट्रराज्ये 'शङ्करपट' इति वृषयानस्पर्धा तथा च तमिळनाडुप्रान्ते बलीवर्देनसह द्वन्द्वयुद्धं सर्वोच्चन्यायालयेन प्रतिबन्धितौ स्तः। पशूनां प्रति क्रूरता तादृशेषु सङ्क्रान्तिपर्वणि प्रचलितेषु खेलेषु वरीवर्ति इति।

■ **सङ्क्रान्तिपर्व** पोङ्गल, शबरीमलैयात्रा, माघमेला, पतङ्गोत्सवः, तिलगुडमिष्टान्नप्रदानमित्यादि पारम्पारिकं सांस्कृतिकं पर्व देशे सर्वत्र सोत्साहं सम्पत्स्यते। *(सम्पादकीयं द्रष्टव्यम्।)*

■ **स्वामिविवेकानन्दजयन्त्यवसरे** युवकमहोत्सवः देशविदेशेषु ११-१२-१३ जानेवारीदिनाङ्केषु स्थानेस्थाने समायोजितः अभवत्। पञ्चदिवसीयं विंशतितमं राष्ट्रिययुव-सम्मेलनमपि छत्तीसगढप्रान्ते रायपुरनगरे प्रधानमन्त्रिणा समुद्घाटितम्।

■ **पठाणकोट-आतङ्कप्रहारविषये** पाकिस्ताने प्रशासनस्य क्षीणः प्रतिस्पन्दः। परिणामवशात् स्थगितं भवति परस्परं वार्तालापायोजनम्।

■ **ऊननवतितमं मराठीसाहित्यसम्मेलनम्** अद्य पुणेसमीपे पिम्परीचिञ्चवडमध्ये प्रारभ्यते। सम्मेलनाध्यक्षः श्रीपालः सबनीसः दुर्वक्तव्यैः कुप्रसिद्धः क्षमां याचयित्वा सम्मेलनस्यास्य सफलतां प्रार्थितवान्। श्रीशरदपवारः उद्घाटकः, मुख्यमन्त्री देवेन्द्रफडणवीसः, कविश्च गुलजारः प्रभृतयः प्रमुखातिथयः भवन्ति।

प्रहेलिका: (कोऽहम्?)

१) मम अङ्गणमधिकं विशालम् - परन्तु तस्मिन् एकः अपि बालकः क्रीडितुं न शक्नोति।

२) सुन्दरो राजा रात्रौ आगच्छेत् - परन्तु दिने गच्छेत्।

३) मम अश्वः कृष्णवर्णः - परन्तु स्नानं कारयेत् चेत् श्वेतवर्णः भवेत्।

४) मम पिता हरितवर्णः - परन्तु पुत्री रक्तवर्णा, पुत्रः कृष्णवर्णः।

५) अस्माकं माता निकटे अस्ति, पिता अति दूरे अस्ति - एतयोः सन्तानम् अहम्। मया विना भोजनमरुचिकरं भवेत्। के वयम् - माता, पिता तथा सन्तानानि?

उत्तराणि - १) आकाशः, २) चन्द्रः, ३) माषः, ४) कालिन्दम्, ५) सागरः, सूर्यः, लवणम्

● **वसन्ता-श्यामलम्**

संस्कृत-भाषा-प्रचारिण्या: सभाया: इदं साप्ताहिकं राष्ट्रीयसंस्कृतसंस्थान, नई दिल्ली द्वारा प्रदत्तेन आंशिकार्थ सहाय्येन डॉ. चन्द्रगुप्त वर्णेकर: इत्यनेन सभाया: सचिवेन कृष्णचंद्र एजन्सीज, नागपुरम् इत्यत्र मुद्रापयित्वा संस्कृत-भवने २, पश्चिम-उच्च-न्यायालय-मार्ग, नागपुरे प्रकाशतां नीतम्।